अर्हञ्जिनः पारगतस्त्रिकालवित्क्षीणाष्टकर्मा परमेष्ठ्यधीश्वरः ।
शंभुः स्वयंभूर्भगवाञ्जगत्प्रभुस्तीर्थंकरस्तीर्थकरो जिनेश्वरः ॥ २४

स्याद्वाद्यभयदसार्वाः सर्वज्ञः सर्वदर्शिकेवलिनौ ।
देवाधिदेवबोधदपुरुषोत्तमवीतरागाप्ताः ॥ २५

एतस्यामवसर्पिण्यामृषभोऽजितशंभवौ । अभिनन्दनः सुमतिस्ततः पद्मप्रभाभिधः ॥ २६
सुपार्श्वश्चन्द्रप्रभश्च सुविधिश्चाथ शीतलः । श्रेयांसो वासुपूज्यश्च विमलोऽनन्ततीर्थकृत् ॥ २७
धर्मः शान्तिः कुंथुररो मल्लिश्च मुनिसुव्रतः । नमिर्नेमिः पार्श्वो वीरश्चतुर्विंशतिरर्हताम् ॥ २८

ऋषभो वृषभः श्रेयाञ्श्रेयांसः स्यादनन्तजिदनन्तः ।
सुविधिस्तु पुष्पदन्तो मुनिसुव्रतसुव्रतौ तुल्यौ ॥ २९

अरिष्टनेमिस्तु नेमिर्वीरश्चरमतीर्थकृत् । महावीरो वर्धमानो देवार्यो ज्ञातनन्दनः ॥ ३०
गणा नवास्यर्षिसंघा एकादश गणाधिपाः । इन्द्रभूतिरग्निभूतिर्वायुभूतिश्च गौतमाः ॥ ३१
व्यक्तः सुधर्मा मण्डितमौर्यपुत्रावकम्पितः । अचलभ्राता मेतार्यः प्रभासश्च पृथक्कुलाः ॥ ३२
केवली चरमो जम्बूस्वाम्यथ प्रभवप्रभुः । शय्यंभवो यशोभद्रः संभूतविजयस्ततः ॥ ३३
भद्रबाहुः स्थूलभद्रः श्रुतकेवलिनो हि षट् । महागिरिसुहस्त्याद्या वज्रान्ता दशपूर्विणः ॥ ३४
इक्ष्वाकुकुलसंभूताः स्याद्द्वाविंशतिरर्हताम् । मुनिसुव्रतनेमी तु हरिवंशसमुद्भवौ ॥ ३५
नाभिश्च जितशत्रुश्च जितारिरथ संवरः । मेघो धरः प्रतिष्ठश्च महासेननरेश्वरः ॥ ३६
सुग्रीवश्च दृढरथो विष्णुश्च वसुपूज्यराट् । कृतवर्मा सिंहसेनो भानुश्च विश्वसेनराट् ॥ ३७
सूरः सुदर्शनः कुम्भः सुमित्रो विजयस्तथा । समुद्रविजयश्चाश्वसेनः सिद्धार्थ एव च ॥ ३८
मरुदेवा विजया सेना सिद्धार्था च मङ्गला । ततः सुसीमा पृथ्वी लक्ष्मणा रामा ततः परम् ॥ ३९
नन्दा विष्णुर्जया श्यामा सुयशाः सुव्रताचिरा । श्रीर्देवी प्रभावती च पद्मा वप्रा शिवा तथा ॥४०
वामा त्रिशला क्रमतः पितरो मातरोऽर्हताम् । स्याद्गोमुखो महायक्षस्त्रिमुखो यक्षनायकः ॥ ४१
तुम्बरुः कुसुमश्चापि मातङ्गो विजयोऽजितः । ब्रह्मा यक्षेट् कुमारः षण्मुखपातालकिंनराः ॥ ४२
गरुडो गन्धर्वो यक्षेट् कुबेरो वरुणोऽपि च । भृकुटिर्गोमेधः पार्श्वो मातङ्गोऽर्हदुपासकाः ॥ ४३
चक्रेश्वर्यजितबला दुरितारिश्च कालिका । महाकाली श्यामा शान्ता भृकुटिश्च सुतारका ॥ ४४
अशोका मानवी चण्डा विदिता चाङ्कुशा तथा । कंदर्पा निर्वाणी बला धारिणी धरणप्रिया ॥ ४५
नरदत्ताथ गान्धार्यम्बिका पद्मावती तथा । सिद्धायिका चेति जैन्यः क्रमाच्छासनदेवताः ॥ ४६
वृषो गजोऽश्वः प्लवगः क्रौञ्चोऽब्जं स्वस्तिकः शशी । मकरः श्रीवत्सः खड्गी महिषः सूकरस्तथा ४७
श्येनो वज्रं मृगश्छागो नन्द्यावर्तो घटोऽपि च । कूर्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्हतां ध्वजाः ४८

रक्तौ च पद्मप्रभवासुपूज्यौ शुक्लौ तु चन्द्रप्रभपुष्पदन्तौ ।
कृष्णौ पुनर्नेमिमुनी विनीलौ श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये ॥ ४९

उत्सर्पिण्यामतीतायां चतुर्विंशतिरर्हताम् । केवलज्ञानी निर्वाणी सागरोऽथ महायशाः ॥ ५०
विमलः सर्वानुभूतिः श्रीधरो दत्ततीर्थकृत् । दामोदरः सुतेजाश्च स्वाम्यथो मुनिसुव्रतः ॥ ५१

---

१. 'सर्वीय'. २. 'संभवौ'. ३. 'नेमी' नान्तोऽपि. ४. 'अजिता' इत्यपि. ५. 'अच्युतदेवी' इत्यपि. ६. 'सुतारा' इत्यपि. ७. 'कूष्माण्डी' इत्यपि.

Digitized by Google